श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरङ्गनाथसुप्रभातम् ॥

अम्भोरुहाणि विकसन्त्यरुणस्य भासा
शक्रस्य दिग्भवति पाटलिता तथैव।
म्लाना भवत्युडुगणस्य रुचिर्जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ १ ॥

भृङ्गाः पतन्ति कुमुदानि विहाय पद्मे-
ष्वार्तं रथाङ्गमिथुनं समुपैति योगम्।
रौतीह पक्षिपरिषत्परितो जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ २ ॥

उद्यानसद्मसु विहृत्य सह प्रियाभि-
र्नक्तं युवान उपयान्ति पुनर्गृहाणि।
चन्द्रो न भाति सह दीपगणैर्जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ३ ॥

नक्तं प्रपासु पथिकाः सुखसुप्तिभाजो
निद्रां विहाय परितः स्वपथान् प्रयान्ति।
शोश्रूयते निगमपाठरवो जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ४ ॥

विप्रा गृहीतसकलोपकराः प्रयान्ति
स्नानादिकर्मकरणाय कवेरकन्याम्।
सङ्कल्पयन्ति वनिता वसतीर्जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ५ ॥

सह्याद्रिजापयसि चोषसि यायजूकाः
स्नात्वाग्निहोत्रशरणे प्रणयन्ति वह्नीन्।

www.prapatti.com

वीथ्यां परिभ्रमति भक्ततर्तिर्जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ६ ॥

गोवाजिहस्तिगणिकाः पुरतः स्थितास्ते
वीणाध्वनिः परिजना जलपूर्णकुम्भः।
सज्जार्चकाश्च सकला इतरे जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ७ ॥

वेदान्तयुग्ममुभये विबुधाश्च सर्वे
त्वां बोधयन्ति मुदिताः स्तुतिभिः प्रियाभिः।
उत्तिष्ठ शेषशयनादव तान् जय त्वं
श्रीरङ्गनाथ भगवन् तव सुप्रभातम्॥ ८ ॥

॥ इति श्रीरङ्गनाथसुप्रभातं समाप्तम् ॥

www.prapatti.com